**NAME OF THE TEACHER: BARNALI BANERJEE**

**NAME OF THE DEPARTMENT: SANSKRIT**


विषय : संस्कृत-व्याकरणम्

एकक : अच् सन्धि-प्रकरणम्

उप-एकक : इको यणचि ( सूत्रव्याख्या )

सूत्रम् :- इको यणचि (६/१/७७ पाणिनि)

पदच्छेद : इकः यण् अचि

सूत्रस्य विभक्तिनिर्देश: :-

इक: - इक् + ङस् -षष्ठ्येकवचनम्

यण - यण् + सु - प्रथमैकवचनम्

अचि - अच् + ङ-सप्तम्येकवचनम्

अधिकारसूत्रम् :- "संहितायाम् (६/१/७२)

इक :- अत्र 'इक्' इत्यनेन इ, उ, ऋ, ऌ इति माहेस्वरसूत्रान्तर्गताः अर्थाः वोध्यन्ते ।

न केवलं इ , उ, ऋ, ऌ अपितु "अनुदित्सवर्णस्य चाप्रत्ययः " इति परिभाषासूत्रानुसारेण दीर्घवर्णाः अपि गृह्यन्ते । अतः -
इकः = इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ अपि वोध्यन्ते ।

NAME OF THE TEACHER: BARNALI BANERJEE

NAME OF THE DEPARTMENT: SANSKRIT

यण् :- इत्यनेन य्, व्, र्, ल् वोध्यन्ते ।

अचि : इत्यनेन माहेस्वर-सूत्रान्तर्गताः अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्यादयः वोध्यन्ते ।

**इक्–वर्णस्य स्थाने स्वरे परे संहितायाम् यण्–वर्णादेशः भवति ।**

इक् प्रत्याहारे चत्वारः वर्णाः समाविश्यन्ते - इ, उ, ऋ, ऌ । यण् प्रत्याहारे अपि चत्वारः वर्णाः समाविश्यन्ते - य्, व्, र्, ल् । इक्-वर्णानाम् स्थाने स्वरे परे यथासङ्ख्यमनुदेशः समानाम् 1|3|10 इत्यनेन क्रमेण यण्-वर्णादेशाःभवन्ति।

यथा -

1. इकारस्य स्थाने यकारः – पाणि + अत्र → पाण् य् + अत्र → पाण्यत्र ।
2. ईकारस्य स्थाने यकारः - नदी + अत्र → नद् य् + अत्र → नद्यत्र ।
3. उकारस्य स्थाने वकारः - मधु + इति → मध् व् + इति → मध्विति ।
4. ऊकारस्य स्थाने वकारः - वधू + आदेश = वध् व् + आदेश → वध्वादेश ।
5. ऋकारस्य स्थाने रेफः - पितृ + इच्छा = पित् र् + इच्छा = पित्रिच्छा ।
6. ऌकारस्य स्थाने लकारः - ऌ + आकृति = ल् आकृति = लाकृति ।

NAME OF THE TEACHER: BARNALI BANERJEE

NAME OF THE DEPARTMENT: SANSKRIT


ज्ञातव्यम् -

1. इक्-वर्णात् परस्य सवर्णे इक्-वर्णे परे परत्वेन अपवादत्वेन च "अकः सवर्णे दीर्घः" 6|1|101 इत्यनेन सवर्णदीर्घम् भवति ।

2. अत्र इक्-वर्णेन सर्वेषाम् सवर्णानाम् ग्रहणम् भवति, परन्तु यण्-वर्णेन सवर्णग्रहणं न भवति, यतः यण्-वर्णः अत्र "विधीयमानः" अस्ति । अस्मिन् विषये "अणुदित्सवर्णस्य चाप्रत्ययः" 1|1|69 इत्यत्र विस्तारेण उक्तम् अस्ति ।

महर्षि-पाणिनिना प्रणीतं 'इको यणचि' इति सूत्रशरीरं न सम्पूर्णम् । अतः सिद्धान्तकौमुदीकारेण भट्टोजिदीक्षितेन सूत्रशरीरं सम्पूर्णं कृतम् इत्थम् -

" इकः स्थाने यण् स्याद् अचि संहितायां विषये" ।

## सूत्रव्याख्या:

इक - अत्र इक् + ङस् (षष्ठी) = इकः । अत्र "षष्ठी स्थाने योगा" इति परिभाषासूत्रवलात् "स्थाने" इति पदम् उपपद्यते । 'स्थानम्' इति पदस्य अर्थः प्रसङ्गम् योगा च सम्बन्धः।

अचि : अचः पदस्यार्थः इकः स्थाने , अत्र "तस्मिन्निति निर्दिष्टे पूर्वस्य"(२/१/६६) इति परिभाषावलात् अर्थः भवति अचः अव्यवहितपूर्ववर्णाः सूच्यन्ते । अतः अचः अव्यवहितपूर्ववर्तिनः इकः स्थाने यणादेशो भवति ।

**NAME OF THE TEACHER: BARNALI BANERJEE**

**NAME OF THE DEPARTMENT: SANSKRIT**


सूत्रार्थः : इकः स्थाने यणादेशो भवति तदनन्तरम् अचि ( असवर्णम्) स्थिते ।

इ/ई > य्

उ/ऊ > व्

ऋ/ऋ > र्

ऌ/लृ > ल्

## उदाहरणम् :-

सुधी+ उपास्य

- सुध् ई + उपास्य
  (ई- स्थानी) (अच् असवर्ण उ)

> सुध् य् (आदेश) + उपास्य

> सुध्युपास्य

**NAME OF THE TEACHER: BARNALI BANERJEE**

**NAME OF THE DEPARTMENT: SANSKRIT**

विषय : संस्कृत-व्यकरणम् ( अच् सन्धि )

एकक : अनचि च ( ८/४/४७)

सूत्रम् : 'अनचि च' (८/४/४७)

सूत्रच्छेदः - अनचि ( सप्तम्येकवचनम्) , च(अव्ययम्)

अनुवृत्तिः - वा(8/4/45)( अव्ययम्), यरः 8/4/45 (षष्ठ्येकवचनम्) , द्वे 8/4/46 ( प्रथमाद्विवचनम्)

अधिकारः सूत्रः पूर्वत्रासुद्धम् 8/2/1 > संहितायाम् 8/2/108

पाणिनि कृतं 'अनचि च' इति सूत्रशरीरं न सम्पूर्णम् । अतः दीक्षितेन सूत्रशरीरं सम्पूर्णं कृतम् । अत्र अधिकारः सूत्रः 'संहितायाम्' ।

सूत्रार्थः :- अचः परस्य यरो द्वे वा स्तो न त्वचि ।

विभक्तिनिर्देशः :-

अचः - अच् + पञ्चमी एकवचनम्

परस्य - पर + षष्ठी एकवचनम्

यरः - यर् + षष्ठी एकवचनम्

NAME OF THE TEACHER: BARNALI BANERJEE

NAME OF THE DEPARTMENT: SANSKRIT

"अनच्" इत्युक्ते "न अच्" । स्वरात् परस्य यर्-वर्णस्य परे स्वरः नास्ति चेत् विकल्पेन द्वित्वं भवति इत्यर्थः । यथा -

1) "कृष्णः" इत्यत्र ऋकारात् परः यर्-वर्णः षकारः अस्ति । तस्मात् परः स्वरः नास्ति, अतः षकारस्य अनेन सूत्रेण विकल्पेन द्वित्वं भवितुं शक्यते । यथा - कृष्ष्णः ।

2) "मति + अत्र" अस्मिन् यण्-सन्धौ इकारस्य यणादेशे कृते "मत्य् + अत्र" इति स्थिते अनेन सूत्रेण तकारस्य विकल्पेन द्वित्वं कृत्वा "मत्यत्र, मत्त्यत्र" एते द्वे रूपे सिद्ध्यतः ।

द्रष्टव्यम्-

1. अस्मिन् सूत्रे निर्दिष्टः स्थानी "यर्" वर्णः अस्ति । यर्-प्रत्याहारे हकारम् विहाय अन्यानि सर्वाणि व्यञ्जनानि समावेश्यन्ते ।। अत्र यरः इत्यनेन ( ह य व र ट्/ ल ण् / ज ब ग ड द श् / ख फ छ ठ थ ट त व् / क प य् / श ष स र् ) इति माहेश्वसूत्रान्तर्गताः वर्णाः वर्तन्ते । अतः हकारस्य अनेन सूत्रेण द्वित्वं न विधीयते ।

2. यर्-प्रत्याहारे वस्तुतः रेफः समाविष्टः अस्ति, परन्तु अचो रहाभ्यां द्वे 8|4|46 अचः परः रेफः आगच्छति चेत् तस्मात् परस्य यर्-वर्णस्य द्वित्वं भवति । अतः अचः परस्य रेफस्य अपि अनेन सूत्रेण द्वित्वं न विधीयते ।

## सूत्रव्याखा :-

पाणिनिकृतं सूत्रशरीरं सम्पूर्णं करणार्थं अस्मिन् (८/४/४७) सूत्रे "यरोऽनुनासिकेऽनुनासिको वा (८/४/४६) इति सूत्रात् "यरः" 'वा' इति पदानां अनुवृत्तिर्भवति। पुनः "अचो रहाभ्यां द्वे" ( ८/४/४६) इति सूत्रात् 'द्वे' पदस्य अनुवृत्तिं कृत्वा सूत्रशरीरं इद्दशं भवति – "अचः पदस्य यरो द्वे वा स्तो न त्वचि"

**NAME OF THE TEACHER: BARNALI BANERJEE**

**NAME OF THE DEPARTMENT: SANSKRIT**

अतः सूत्रार्थः अचः परस्य यरः विकल्पे वारद्वयम् उच्चारणं भवति अच् परे नास्ति चेत् ।

## उदाहरणम्

**सुधी + उपास्य**

- **सुध् ई + उपास्य**
- सुध् य् + उपास्य
  (यर्) (न अच्)
- सुध् ध् य् + उपास्य

= सुध्ध्युपास्य इति पदं सिद्धम् ।